 ISSN 976-8645

# निद्रा एवं स्वप्नविषये आयुर्वेददृष्टिः

बकमूणे इन्दरतनः[128]

**शोधसारः**

*"निद्रा एवं स्वप्नः" आ इतिहासात् अद्यावधि दर्शनशास्त्रे एवं मनोविज्ञानशास्त्रे च चर्चारोचकविषयः। अपिच अन्यज्ञानपरम्परासु च तत्तद्दृष्ट्यानुसारम् एषः विषयः चर्चितः। तस्मादेव एतत्विषयमुपरि मतवैभिन्नं च दृश्यते। अस्मिन् सन्दर्भे आयुर्वेदश्च न न्युनतमः। मुख्यायुर्वेदग्रन्थेषु तत्र तत्र निद्रा एवं स्वप्नविषये कृतम् अर्थनिरूपणं, विश्लेषणं, स्वप्नार्थनिरूपनञ्चोपलभ्यते। अस्मिन् पत्रे "निद्रा एवं स्वप्नः" इत्येतत्द्वयोः का निरुक्तिः, कः अर्थः, कथं स्वप्नार्थनिरूपणं विश्लेषणं च इत्यादीनां विषयानामुपरि आयुर्वेदाचार्यानां का दृष्टिः इति मया चर्चा विधीयते। आयुर्वेदे "स्वप्न" इति पदस्य निद्रा एवं स्वप्नः (sleep and dream) इति उभयमपि अर्थः गण्यते। अत्र वृद्धत्रयी (चरकसंहिता, सुश्रुतसंहिता, वाग्भटसंहिता) एवं लघुत्रयी (भेलसंहिता, काश्यपसंहिता, हारीतसंहिता) च मुख्यस्त्रोतभूता भवति। अत्र तथा सिग्मन्ड्-फ्रोयिड् इत्यादीनां नूतन-मनोवैज्ञानिकानां दृष्या च सह आयुर्वेदीयमतस्य तुलना च विधीयते।*

**कूटशब्दाः** - *स्वप्नः, निद्रा, निरुक्तिः, शुभम्-अशुभं, प्रशस्तम्-अप्रशस्तं, विश्लेषकः, अर्थः*

आयुर्वेदे "निद्रा", "तन्द्रा", "स्वप्न" इयादिपदानां निरुक्तिः कृता उपलभ्यते। भेलसंहितानुसारं निद्रा जायते यदा सत्त्वे तमसा समाक्रान्ते, दिवससंक्षयात् इन्द्रियाणि कर्मभ्यः क्रमात् विरमन्ति; अथ भुक्ते अन्नपाने पच्यमाने हृद्गतेन विवृद्धेन श्लेष्मणा चक्षुः श्रोतवहेषु च निरुद्धेषु; यथा प्राणिनः छेदिता दिवा, सूर्यपादैश्छेदिता कर्मक्रिया, तैस्तैरुक्तैः शरीरमानसैः उपाहृता तामसी तन्द्रा एवंक्रियान्नसंज्ञानि विशति। निद्रा चिन्ताशोकश्रमहरी च[129]। स्वपतः तस्य देहे सहोष्मकौ प्राणापानौ जागृतः, तेन असौ जीवसंयुक्तः न विनश्यति[130]। स्वप्नः नाम यदा इन्द्रियाणामुपरमे मनस्सूपरतं तेषां गोचरं सेवते तं स्वप्ननामकम्। स्वप्नगतः सः पितृदेवमनुष्येषु संभाषणमुपैति च[131]।

## १. निद्रा

शरीरस्य मनसः च विवेकार्थं निद्रा आवश्यकी। संतुष्टिः-असंतुष्टिः, पोषणं-जीर्णं, शक्तिः-दौर्बल्यं, पौरुषत्वं-कुपौरुषत्वं, बुद्धिः-अज्ञानं, जीवितं-मरणम् इत्यादिकारणविषये निद्रा एव मूलभूता अस्ति। आयुर्वेदेन ऋत्वनुसारं, जनदेहानुसारं च निद्रा कथं करणीया इति निर्दिष्टा अस्ति[132]।

---

[128] पीएच्.डी शोधच्छात्रः विशिष्टसंस्कृताध्ययनकेन्द्रम् जवाहरलालनेहरूविश्वविद्यालयः नवदेहली

[१] भेलसंहिता ६.२३.१-५

[२] भेलसंहिता ६.२३.६

[३] भेलसंहिता ६.२३.७-८

४ cÉUMü 1.21.३५

यदा मनः शरीरं च क्रियारहिते भवतः, रूपादिविषयेभ्यः विनिर्मुक्ते भवतः तादृगवस्था निद्रा इति कथ्यते आयुर्वेदे। कफ-वात-तमकारणात् नरस्य निद्रा-अवस्था जायते[133]। यथानिद्रया सुखं, पुष्टिः, बलं, वृषता, ज्ञानं, जिवितं च वर्धन्ते। अतिनिद्रया दुःखं, कार्श्यम्, अबलं, क्लीमता, अज्ञानं, मरणं च जायन्ते[134]। सुखिभिः अकालनिद्रा, दिवास्वप्नं च न निषेवणीयमिति आयुर्वेदेनोपदिष्टम्[135]।

अजीर्णिनः, क्षताः, क्षीणाः, वृद्धाः, बालाः, अबलाः, तृष्णातीसारसूलार्ताः, श्वासिनः, हिक्किनः, कृषाः, उन्मताः, क्रोधशोकभयक्लान्ताः, प्रजागराश्च दिनेऽपि निद्रां सेवितुमर्हाः। तेन तेषां धातुसाम्यं बलं च उपजायते, श्लेष्मा पुष्णाति, अङ्गानि स्थैर्याणि भवन्ति, आयुषं वर्धते[136]। एवं ग्रीष्मे, मारुते वर्धमाने च दिवास्वप्नः प्रशस्यते[137]। धुरिणां गीतैर्नृत्यैर्हास्यैः दिवा निद्रां हन्तीति हारीतः कथयति। तथा सुखनिद्रायां कृते अपिच रात्रौ यदि निद्रा न आयाति तदापि करणीयानि कार्याणि सेवनीयानि द्रव्याणि च उपदिष्टानि सन्ति हारीतसंहितायाम्[138]।

परन्तु ग्रीष्मवर्ज्येषु कालेषु दिवास्वप्नात् श्लेष्मपित्ते प्रकुप्येते। तस्मात् तेषु दिवास्वप्नः न शस्यते। मेदस्विनः, स्नेहनित्याः, श्लेष्मलाः, श्लेष्मरोगिणः, दूषीविषार्ताश्च कदाचन दिवा न शयीरन्[139]। दिवास्वप्नात् हलीमकः, शिरःशूलं, स्तैमित्यं, गुरुगात्रता, अङ्गमर्दः, अग्निनाशः, हृदयस्य प्रलेपः, शोफः, रोचकं, हृल्लासः, पीनासः, कण्डूः, तन्द्रा, कासः, गलामयाः, स्मृतिबुद्धिप्रमोहः, संरोधः, स्रोतसां ज्वरः, इन्द्रियाणामसामर्थ्यं, विषवेगप्रवर्तनं च जायते। तस्मात् हिताहितस्वप्नमेव स्वप्यादिति आयुर्वेदे उपदिष्टम्[140]।

रात्रौ जागरणेन रूक्षं, स्निग्धं, दिवा-प्रस्वपनं च जायते[141]। यथा शरीरप्रवर्तनाय आहारः तथैव उचिता निद्राऽपि अत्यावश्यकी[142]।

---

यदा तु मनसि क्लान्ते कर्मात्मानः क्लमान्विताः।
विषयेभ्यो निवर्तन्ते तदा स्वपिति मानवः॥
"स्वप्नश्च निरिन्द्रियप्रदेशे मनोवस्थानम्" तत्र चक्रपाणिदत्तेन कृता व्याख्या।

[133] हारीतसंहिता ३.१४.१७

[६] cÉUMü. 1.21.36

[७] cÉUMü. 1.21.27-38

[८] cÉUMü. 1.21.39-42

[९] cÉUMü. 1.21.43

[138] हारीतसंहिता ३.१४.१-६

[११] cÉUMü. 1.21.4४-४५

[१२] cÉUMü. 1.21.4६-४९

[१३] cÉUMü. 1.21. 50

[१४] cÉUMü. 1.21.51

### २. स्वप्नः

कीदृशः पुरुषः स्वप्नं पश्यति इति चरकाचार्यः दर्शयति यथा नातिनिद्राभिभूतः पुरुषः इन्द्रियप्रेरकेण मनसा अनेकविधान् स्वप्नान् पश्यति। सः स्वप्नः सफलः अथवा अफलश्च भवितुं शक्यते[143]। आयुर्वेदे स्वप्नः शुभम् अशुभमिति अपि च सफलम् अफलमिति द्विधा प्रदर्शितम्। व्यधितः स्वयं वा तस्य सुहृदेन दृष्टः स्वप्नः व्यधिग्रस्तस्य भविष्यमानं हितं वा अहितं प्रवक्षति[144]।

### २.१. स्वप्नस्य शुभाशुभत्वम्

आयुर्वेदस्य स्वप्नार्थव्याकरणं स्वस्थ-अस्वस्थ सम्बन्धि अस्ति। आयुर्वेदानुसारं स्वप्नः सप्तविधः[१३] यथा १. दृष्टः (visual experience) २. श्रुतः (auditory experience) ३. अनुभूतः (allied experience) ४. प्रार्थितः (strong disire) ५. कल्पितः (imagination) ६. भाविकः (future consequences) ७. दोषजः (due to do♣as) इति।

### २.१.१ दुःस्वप्नाः

तत्र यः कश्चित् निम्नलिखितप्राकारकं स्वप्नं पश्यति यदि सः स्वस्थः अस्ति चेत् तस्य व्याधिं, यदि व्याधितः अस्ति चेत् मृत्युश्च भविष्यति[145]। काश्यपानुसारं दुःस्वप्नस्यफलात् धर्मशीलः विमुच्यते[146]।

१. यः कोऽपि स्नेहाभ्यक्तशरीरः करभव्यालगर्दभैः वराहैर्महिषैर्वाऽपि दक्षिणाभिमुखः यायात्।

२. रक्ताम्बरधरा, मुक्तमूर्धजा, हसन्ती, नृत्यन्ती, कृष्णा स्त्री दक्षिणाभिमुखं यं बद्धा आकर्षति।

३. यः दक्षिणाभिमुखः अन्तावसायिभिः आकृष्यते।

४. प्रेताः तथा प्रव्रजिताश्च यं परिष्वजेरन्।

५. श्वापदैर्विकृताननैः यः मुहुराघ्रायते।

६. यः मधु च तैलं पिबेत्।

७. यः पङ्केऽवसीदति, पङ्कप्रदिग्धमात्रो वा प्रनृत्येत् तथा प्रहसेत्।

८. यः निरम्बरः रक्तां स्रजम् शिरसि धारयेत्।

---

देहवृत्तौ यथाऽऽहारस्तथा स्वप्नः सुखो मतः ।
स्वप्नाहारसमुत्थे च स्थौल्यकार्श्ये विशेषतः ॥

[143] चरक ५.५.४२

नातिप्रसुप्तः पुरुषः सफलानफलांस्तथा।
इन्द्रियेशेन मनसा स्वप्नान् पश्यत्यनेकधा॥

[144] सुश्रुत १.२९.४४.२-४२.१ काश्यप इन्द्रियस्थानम्, ओषधभेषजेन्द्रियाध्यायः २५-२७.१

[145] सुश्रुत १.२९.४५.२-६६

[146] काश्यप इन्द्रियस्थानम्, ओषधभेषजेन्द्रियाध्यायः २५-२७.१

९. यस्य उरसि वंशः, नलह् वा तालः जायेते।

१०. यं मत्यः ग्रसेत्।

११. यः जननीं प्रविशेत्।

१२. यः पर्वताग्रात् तमसाऽऽवृते श्वभ्रे पतेत्।

१३. यः स्त्रोतसा ह्रियेत।

१४. यः मौण्ड्यमवाप्नुयात्।

१५. यः काकाद्यैः अभिभूयते, पराजीयेत, वा बध्येत।

१६. यः तारकादीनां पतनं, दीपचक्षुसयोः प्रणशं, देवतानां तथा अवनेः प्रकम्पं पश्येत्।

१७. यस्य छर्दिः वा विरेकः जायते अथ वा दशनाः पतन्ति।

१८. यः शाल्मलीं, किंशुकं, यूपं, वल्मीकं, पारिभद्रकं, पुष्पाढ्यं कोविदारं वा चितां अधिरोहति।

१९. यः कार्पासतैलपिण्याकलोहानि, लवणं, तिलान् लभेत।

२०. यः पक्वान्नं आश्नीत वा सुरां पिबेत्।

यः कोऽपि निम्नलिखितप्रकारकं स्वप्नं पश्यति तस्य विनशः भविश्यति।

१. ज्वरितः शुना स्ख्यं पश्येत्।

२. शोषितः कपिसख्यं पश्येत्।

३. उन्मादावस्थायां राक्षसैः वा अपस्मारे प्रेतैः प्रवर्तनम् पश्येत्।

४. मेहातिसारिणः तोयपानम् पश्येत्।

५. कुष्ठिः स्नेहपानं पश्येत्।

६. गुल्मावस्थायां कोष्ठे स्थावरोत्पत्तिः पश्येत्।

७. शिरोरुजावस्थायां मूर्ध्नि स्थावरोत्पत्तिः पश्येत्।

८. छर्द्यां शष्कुलीभक्षणं पश्येत्।

९. श्वासपिपासयोः अध्वा पश्येत्।

१०. हारिद्रं पाण्डुरोगिणः भोजनं पश्येरन्।

११. रक्तपित्ती शोणितं पिबेत्।

अस्मिन्नेव सन्धर्भे कास्यपसंहितायामपि उत्कृष्टं विवरणं प्राप्यते[147]। कौमारभृत्यं कास्यपसंहितायाः मुख्यविषयभूतत्वात् अत्र स्वप्नार्थविश्लेषणं अधिकतः मातुः धात्र्याः शिशोश्च स्वप्नसम्बन्धी अस्ति। अपिच काश्यपसंहितायाः स्वप्नार्थविश्लेषणे विशेषः हि केषाञ्चन स्वप्नानां फलं भविष्यं स्कन्दादिग्रहेभ्यः भयमिति व्यखानम्। सर्वेषामेव स्वप्नानां फलं शिशोरुपर्यैव भविश्यति।

[147] कास्यपसंहिता, इन्द्रियस्थानम्, ओषधभेषजेन्द्रियाध्यायः ८-३५

१. यः अधिपानगः नाशः, ज्योतिषां पतनानि, अग्निदाहोपशान्तिः पतनं, गुहाटवीप्रवेशः, विगर्हितं, तथा कृष्णां दण्डधरां नग्नां, मुण्डां, लोहितलोलोचनां स्त्रीं स्वप्ने पश्यति तस्य यमदूतानुपस्थितानिति जानीयात्। अर्थात् तस्य मृत्युः निकटे एव अस्ति।

२. यस्यां रात्रौ यः दीर्घकेशस्तननखीं विरागकुसुमामरां, कृष्णां स्त्रियं स्वप्ने पश्यति तां रात्रीं कालरात्रीमिति निवेदयेत्। अर्थात् सा रात्री मृत्योः रात्री।

३. या माता वा शिशुः रक्तानि गन्धान्, पुष्पाणि, वासांसि स्वप्ने निषेवते वा पश्यति तदा स्कन्दग्रहाद्भयम् भविष्यति। अर्थात् स्कन्दग्रहः ग्राहयति वा स्कन्दग्रहावेशकारणात् मृत्युः भविष्यति।

४. यः शिशुः मयूरं, कुक्कुटं, बस्तं, मेषं वा अधिरोहति; तथा एतैः सह रक्तार्चितः; अथ वा भुवि विध्वस्तां घण्टां पताकां पश्यति; शोणिताक्तं शयनं वा पश्यति तदा स्कन्दग्रहाद्भयम् भविष्यति।

५. यदि माता रक्तपुष्पाम्भरधरा रक्तचन्दनरूषिता भूतैः सह नृत्यते तदा स्कन्दापस्मारतो भयं जायते।

६. यदा धात्री रक्तपद्मवनं प्राप्य पद्ममालाभिः सह आत्मानं वा बालं अर्चति तदा स्कन्दपितुः भयं भविष्यति।

७. यदि धात्री स्वप्ने रक्तपुष्पवनं वा अग्निं विशेत् वा बालः अग्निना दह्यते तर्हि पौण्डरीकग्रहाद्भयम् भविष्यति।

८. यदा बालं समुद्रादिषु तोयेषु निमग्नं पश्यति तदा रेवतीभयं जायते।

९. यदा बालः वा माता स्वप्ने शुष्ककूपनदीं वा पश्यति तदा बालस्य मृत्युः शुष्करेवतीतः भविष्यति।

१०. यदा बालः वा माता स्वप्ने मांसादान् पक्षिणः पश्यति बालः शकुन्या वध्यते।

११. यदा बालः अवडीनाभिदष्टः पश्यति सद्यः मरणं भवति।

१२. यः हरितालादिभी रङ्गैर्मण्डितः पीतकाम्बरः मांसलोऽलङ्कृतः स्वप्ने पश्यति तं मुखमण्डिका हन्ति।

१३. यदा माता वा बालः नक्षत्रग्रहचन्द्रार्कतारकाः, प्रपतिताः अक्षिकनीनिकाः स्वप्ने पश्यति तदा पूतनाभ्यो भयं जायते।

१४. यः एतानि सर्वाणि रूपाणि पश्यति तस्य नैगमेषाद्भयं जायते।

१५. यः कीटवृश्चिकसर्पैर्वा दष्टः विषमृत्युकः; श्वभिर्वा दुष्टैः खरैर्वा दक्षिणां याति, अथवा मुण्डितः तैः कृष्यते मृध्यते वा पस्यति तदा ज्वरात् मृत्युः भविष्यति।

चरकाचार्योऽपि एवंविधदुःस्वप्नानां विवरणं करोति यथा[148];

१. यः स्वप्ने श्वभिरुष्ट्रैः खरैर्वाऽपि दक्षिणां दिशं याति सः यक्ष्माणमासाद्य जीवितं विमुञ्चति।

२. यः स्वप्ने प्रेतैः सह मद्यं पिबेत्, अथवा शुना कृष्यते सह् सुघोरंज्वरमासाद्य जीवितं विमुञ्चति।

३. यः लाक्षारक्ताम्बराभम् अम्बरम् अन्तिकात् पश्यति सः रक्तपित्तमासाद्य तेनैव म्रियते।

४. यः स्वप्ने रक्तस्रग्रक्तसर्वाङो रक्तवासा मुहुर्हसन् नार्या नीयते सः रक्तपित्तं प्राप्य सीदति[149]।

५. स्वप्ने दारुणा कण्टकिनी लता यस्य हृदि जायते तदा क्रूरः गुल्मः तं मानवम् अन्ताय विशति[150]।

[148] चरक ५.५

[149] चरक ५.५.८-११

६. स्वप्ने नग्नस्य, आज्यावसिक्तस्य, अनर्चिषम् अग्निं जुह्वतः मरनं कुष्ठैः भविष्यति।

७. यस्य उरसि स्वप्ने पद्मानि जायन्ते सोऽपि कुष्ठैः मरिष्यति[151]।

८. स्नेहानुलिप्तगात्रेऽपि यस्मिन् मक्षिकाः गृध्नन्ति सः प्रमेहेण संस्पर्शं प्राप्य तेनैव हन्यते।

९. यः स्वप्ने चन्डालैः सह बहुविधं स्नेहं पिबेत् सः प्रमेहेण बध्यते तेनैव च मरिष्यति[152]।

१०. यः स्वप्ने रक्षोगणैः सह नृत्यन् अम्भसि सीदति सः भृशमुन्मादं प्राप्य मरिष्यति।

११. स्वप्ने मत्तं नृत्यन्तं यं नरं प्रेतः आविध्य हरति अपस्मारपुरःसरः तं मृत्युः हरति[153]।

१२. यः स्वप्ने शस्कुलीर्वा अपूपान् वा खादति प्रबुद्धः सः एतादृक् छर्दयति चेत् न जीवति[154]।

कदा नरः दुःस्वप्नं वा सफलं स्वप्नं पश्यति इति सन्दर्भे चरकस्य मतं एवंविधम्[155]। मनोवहानां (हृदयाश्रितत्वान्मनसस्तदाश्रिता दश धमन्यः) स्रोतसां अतिबलैस्त्रिभिः दोषैः पूर्णत्वात् दारुणे काले दारुणान् स्वप्नान् पश्यति। पुरुषः नातिप्रसुप्तः इन्द्रियप्रेरकेण मनसा सफलानफलान् स्वप्नान् अनेकधा पश्यति।

हारीतसंहितानुसारं निशायां प्रथमे प्रहरे दृष्टः स्वप्नः संवत्सरेण, द्वितीये प्रहरे दृष्टः स्वप्नः अर्धसंवात्सरेण, तृतीये प्रहरे दृष्टः स्वप्नः मासत्रयेण, निशावसाने दृष्टः स्वप्नः दशदिनेन, वर्षादिने मध्यदिने दृष्टः स्वप्नः षण्मासिकेन मनुष्ये शुभस्य अशुभस्य फलदः इति प्रवदन्ति[156]।

यदि कोऽपि दारुणान् स्वप्नान् पश्यति तर्हि पूतः, स्नातः अग्निवर्णान् सर्षपान्, सर्पिशाक्तांस्तिलांश्च सावित्र्या हुत्वा पापैः व्याधिभिश्च मुच्यते[157]। सुस्रुताचार्यः उपदिशति यत् एवंविधान् स्वप्नान् दृष्ट्वा यत्नवान् प्रातरुथाय माषांस्तिलांल्लोहं काञ्चनं च विप्रेभ्यः दद्यात्। शुभान् त्रिपदां गायत्रीं मन्त्रान् जपेत्। प्रथमे यामे दृष्ट्वा ध्यात्वा पुनः स्वप्यात्। ब्रह्मचारी समाहितः शुभम् अन्यतमं वेदं जपेत्। अशोभनं स्वप्नं दृष्ट्वा कस्मैचित् न आचक्षीत। देवतायतने रात्रित्रयं वसेत्। विप्रांश्च नित्यं पूजयेत्। एवंविधकारणैः दुःस्वप्नात् प्रविमुच्यते[158]। हारीतसंहितापि निशायां दृष्टदुःस्वप्नफलात् विमोक्तुं मन्त्रं, स्नानं, दानं, सुरार्चनं, होमं च कुर्यादिति निर्दिशति[159]।

---

[150] चरक ५.५.१३
[151] चरक ५.५.१५
[152] चरक ५.५.१६-१७
[153] चरक ५.५.२१-२३
[154] चरक ५.५.२५
[155] चरक ५.५.४१-४२
[156] हारीत २.२.३-४
[157] काश्यप, इन्द्रियस्थानम्, ओषधभेषजेन्द्रियाध्यायः ३५
[158] सुश्रुत १.२९.७१-७४
[159] हारीत २.२.२८-२९

**२.१.२ अप्रशस्त/अकल्याण-स्वप्नाः**

१. शीतकृशात्मनाम् मलिनाम्बरपुष्पाणां द्विजादीनां स्वप्ने दर्शनं न प्रशस्यते[160]।

चरकसंहितानुसारं निम्नलिखितस्वप्नाः व्याधितानां विनाशाय वा अरोगस्य रोगाय च कारणभूताः सन्ति[161]।

२. स्वप्ने यसोत्तमाङ्गे वंशगुल्मलतादयः जायन्ते, वयांसि विलीयन्ते यः मौण्ड्यमियाच्च।

३. यः स्वप्ने गृध्रोलूकश्वकाकाद्यैः रक्षःप्रेतपिशाचस्त्रीचण्डालद्रविडान्ध्रकैः परिवार्यते।

४. यः स्वप्ने वंशवेत्रलतापाशतृणकण्टकसङ्कटे संसज्जति वा यः गच्छन् प्रपतति।

५. यः स्वप्ने भूमौ, पांशूपघानायां, वल्मीके, भस्मनि, श्मशानायतने वा श्वभ्रे प्रपतति।

६. यः स्वप्ने कलुषे अम्भसि, पङ्के, तमसाऽऽवृते कूपे वा मज्जति, एवं यः स्रोतसा शीघ्रेण ह्रियते।

७. यः स्वप्ने स्नेहपानम्, अभ्यङ्गं, प्रच्छर्दनं, विरेचनं, हिरण्यलाभं, कलहं, बन्धं, पराजयं वा पश्यति।

८. स्वप्ने उपानद्युगनाशश्च, पादचर्मणोः प्रपातः, हर्षः, प्रकुपितैः पितृभिश्चावभर्त्सनम्।

९. स्वप्ने दन्तचन्द्रार्कनक्षत्रदेवतादीपचक्षुषां पतनं वा विनाशो वा नगस्य वा भेदः।

१०. यः स्वप्ने रक्तपुष्पं वनं, भूमिं, पापकर्मालयं, चिताम्, अन्धकारसम्बाधं गुहां प्रविशति।

११. यः स्वप्ने रक्तमाली, दिग्वासा, उच्चैः हसन् दक्षिणां दिशं याति वा कपियुक्तेन दारुणामटवीं याति।

१२. काषायिणम् असौम्यानां, नग्नानां, दण्डधारिणां, कृष्णानां, रक्तनेत्राणां स्वप्ने दर्शनम्।

१३. स्वप्ने कृष्णा पापा निराचरा दीर्घकेशनखस्तनी, विरागमाल्यवसना स्त्री कालनिशा मता।

स्वप्ने सर्वाणि कृष्णानि अशुभनि तथा तानि नराणां विपदं वा रुजं कुर्वन्ति। अपितु गोवाजिराजद्विजहस्तिमत्स्यान् स्वप्ने दर्शनं शुभकारी च अस्ति[162]।

१४. यः स्वप्ने काकैः, कङ्कैः, करभभुजगैः, सूकरोलुकागृध्रैर्जम्बूकैः, वृकखरमहिष्यातिरक्षैः, श्वभिः, व्याघ्रैर्गाहैर्मकरकपिभिर्भक्ष्यमाणं स्वकायं पश्येत् असौ नितरां हानिमापद्रुजं वा भजति।

१५. यः मनुजह् स्वम् सर्पिर्वसातैलविषेशणेन अभ्यञ्जितं पश्येत् तदा शीघ्रं रुजार्त्तिर्भवति।

१६. व्याघ्रोष्ट्रखरसंयुक्ते सौरभसंयुते रथे दक्षिणं दिशं याम्यां गच्छेत् सह् मृतिं भजेत्।

१७. रक्तवस्त्रां, कृष्णवस्त्रां, मुक्तकेशां, विसर्पिणीं, स्थितां, रुदन्तीं, गायन्तीं, गायन्तीं, याम्यां पश्यति वा यः संकृद्धाम् आह्वयति, समालिङ्गति, चर्वति यदि सः सुखी तदा व्यधितः, मृत्युं च गच्छति।

१८. यस्य स्वप्ने निष्कुष्टदन्तपातः दृश्यते, केशरोमाणि शीर्यन्ते यदि सः सुखी तदा आपदं व्रजेत्।

---

160 काश्यप, इन्द्रियस्थानम्, ओषधभेषजेन्द्रियाध्यायः २७.२-२८.१

161 चरक ५.५.२७-४०

162 हारीत २.२.६

१९. यस्य खट्वा तोमरादिप्रहारतः प्रभज्येत, देहे रक्तञ्च दृश्यते यदि सः स्वस्थः चेत् तदा व्याधिमृच्छति।

२०. यः स्वप्ने शून्यागारं, देवहीनं प्रासादं, चान्द्रे तथा पुष्पितानां द्रुमानां तापश्च पश्येत् तदा तस्य अनिष्टं आशु मृत्युश्च प्रपद्येत्।

२१. यः भिन्नदेवं मन्दिरं, जलहीनं घटं, भग्नशाखं तरुं च पश्येत् तदा सुखी व्याधिपुञ्जं प्रपद्येत्, रुजाग्रस्तश्च आशु म्रियेत।

२२. यदा स्वप्ने पितरः दक्षिणस्यामाश्रित्य आह्वयन्ति तदा आशु मृत्युं तनुते।

२३. यः शूललकुटोध्यतबाणपाणीनाहूयते स आशु मृतिं लभेत्।

२४. यः स्वप्ने कर्पासभस्मास्थिकपालशूलं चक्रञ्च पाशञ्च पश्येत् तस्यापदो रोगधनक्षयौ वा यदि रोगी चेत् मृतिं वा तनुते[163]।

सुश्रुतानुसारं यथास्वं प्रकृतिः, विस्मृतः, विहतः, चिन्ताकृतः, दिवा दृष्टः, अतिह्रस्वः, अतिदीर्घः स्वप्नः अफलः भवति[164]। काश्यपः अत्र प्रार्थितः, कल्पितः, दृष्टः, अनुभूतः, श्रुतः, भावितः, ह्रस्वः, दीर्घः, दिवा दृष्टः, दोष्जः स्वप्नाश्च अफलाः इति वदति[165]। चरकानुसारं दृष्टः, श्रुतः, अनुभूतः, कल्पितः, दिवास्वप्नः, अतिह्रस्वः, अतिदीर्घश्च स्वप्नः अफलः। प्रथमरात्रे दृष्टः स्वप्नः अल्पफलो भवेत्। अपितु यं स्वप्नं दृष्ट्वा यः पुनः न स्वपेत् सः सद्यः महाफलः स्यात्। यः अकल्याणं स्वप्नं दृष्ट्वा पुनः तत्रैव सौम्यं शुभाकारं पश्येत् तस्य शुभं फलमिति विद्यात्[166]।

### २.१.३ प्रशस्त-स्वप्नाः

प्रशस्तस्वप्नार्थव्याख्यानमपि मुख्यतः आयुर्वेदे स्वस्थ-अस्वस्थभावासम्बन्धी अस्ति।

१. यदि कोऽपि देवान्, द्विजान्, गो-वृषभान्, जीवितः सुहृदः, नृपान्, समिद्, अग्निं साधून्, निर्मलानि जलानि पश्येत् तत् कल्यानलाभाय व्याधेरपगमायच कारणं भवति।

२. यः मांसं, मत्स्यान्, श्वेता स्रजः, वासांसि, फलानि च पश्येत् तदा धनलाभं व्याधेरपगमश्च भवति।

३. महाप्रासादसफलवृक्षवारणपर्वतारोहणं द्रव्यलाभः व्याधेरपगमश्च प्रवक्ष्यते।

४. यः क्षुभितान् कलुषोदकान् नदीनदसमुद्रांश्च तरेत् तत् तस्य कल्यानलाभाय व्याधेरपगमाय च कारणम्।

५. उरगः, जलौकः, भ्रमरः वा यं दशेत् तस्य आरोग्यं धनलाभं च निर्दिशति[167]।

यः व्याधितः नरः एवं रूपान् शुभान् स्वप्नान् पश्येत् सः दीर्घायुः इति आयुर्वेदज्ञैः ज्ञायते। तस्मै वैद्यकर्म च समाचरेत्[168]। चरकोऽपि वैद्यमुपदिशति यत् "यः पूर्वरूपाणि अथ इमान् दारुणान् स्वप्नान् वेत्ति सः भिषक् मोहात् असाध्येषु कर्माणि न आरभते"[169] इति।

---

[163] हारीत २.२१७-२७

[164] सुश्रुत १.२९.६७

[165] काश्यप इन्द्रियस्थानम्, ओषधभेषजेन्द्रियाध्यायः २३.२-२४

[166] चरक ५.५.४४-४६

[167] सुसुत १.२९.७५-८०

[168] सुसुत १.२९.८१

६. हृष्टानां शुद्धाम्बरपुष्पानां स्वप्ने दर्शनं तैश्च सह संभाषणं शुभं शस्यते च।

७. ये स्वप्ने प्रासादवृक्षशैलांश्च हस्तिगोवृषपूरुषान् अधिरोहन्ति तेषां स्वस्त्ययनं भविष्यति।

८. सुर्यसोमाग्निविप्राणां, पुण्यकृतां नृणां, गवां, मत्यामिषस्य, चाषस्य च स्वप्ने दर्शनं मुण्यम्।

९. शुक्लपुष्पादर्शाच्छत्रग्रहणं, तोयलङ्घनं, स्वरक्तं, सुरापानं च स्वप्ने दर्शनं शस्य्ते।

१०. गवाश्वरथयानं, पूर्वोत्तरेण यानं, रोदनं, पतूतोत्थानं, रिपूणां निग्रहः, पङ्ककूपगुहाभ्यः अध्वनश्च समुत्तारः सिद्धये हेतुः भवेत्। एवंविधस्वप्नाः रोगाणां अदारुणत्वं, वैद्यभैषज्यसंभवं, धृतिः, सत्वं धर्मश्च न्वेदयन्ति[170]।

११. स्वप्नेषु सर्वाणि शुभ्राणि शुभानि सन्ति। अपितु कर्पासभस्मास्थिकपालशूलानि शुभ्रान्यपि अशुभानि तथा तानि नराणां विपदं रुजं वा कुर्वन्ति[171]।

१२. मुकुरकुसुमश्रृङ्गारातपत्रद्वजदधिफलवस्त्रान्नतम्बूलकमलकलशशाङ्खं काञ्चनभूषणं स्वप्ने दर्शनं शुभफलदायकम्। यदि अस्वस्थः इमानि पश्यति चेत् सः रोगेभ्यः विनिर्मुच्यते[172]।

१३. यः स्वप्ने दिनकरनिशिनाथं, तारामण्डलं पश्यति, कमलपूर्णपद्माकरं तरति, पूर्णनद्याः पारं गच्छति तस्य धनसुखविभवाप्तिश्च व्याधितां रोगमुक्तिश्च भवति[173]।

१४. देवो, द्विजो, पितरो, नृणो वा स्वप्नेषु यथा वाक्यं वदति तत्, सौख्यं, विपदः, रुजः वा तथैव भवेत्[174]।

१५. यः वाजीकुञ्जरनृपान् स्वप्नेषु पश्यति यदि सः सरुजः चेत् सुखाय, रोगान्वितः रुजनाशनसम्भवाय, बन्धः सपदि बन्धविमोचनाय च हेतुः भवति।

१६. यः भूषणं, मन्दिरं, कन्यां, दधि, मीनकुमारकं, सपुष्पवल्लीफलितं द्रुमं वा पश्यति यदि सः स्वस्थः तदा धनाप्तिं, यदि रुग्णः चेत् रुजनाशनाय च कारणम्[175]।

१७. स्वप्ने पयः पानं अतिप्रशस्तं। सुराया पानं वा अजभोजनं वा घृतं, यवागूः वा भिजनकम् सुखाय कारनम्।

१८. सुप्तस्य नरस्य कराग्रे सितः भुजङ्गः दशति तस्य पुत्रलाभं, धनलाभं वा अतिचिरात् रुजां वा नाशः भवति।[176]।

१९. यः मनुष्यः सश्वेतवस्त्रां, सुरम्यां, रमणीं समालिङ्गति तस्य सुखं, श्रियः, सुपुत्रलाभः, रुजाम् विनाशश्च स्यात्।

२०. यः स्वप्ने तिलतण्डुलानां, गोधूमसिद्धार्थयवादीनां धान्यपुञ्जं पश्येत् तस्य धान्याप्तिः, आमयनाशः, सुखं च भवेत्।

---

"तस्मै वैद्यकर्म समाचरेत्" इत्येतस्य अर्थः हि आयुर्वेदानुसारं व्याधितः साध्य-असाध्य-याप्य-त्याज्येति चतुर्विधः (सुश्रुत १.१०.६)।

169 चरक ५.५.४७

170 काश्यप, इन्द्रियस्थानम्, ओषधभेषजेन्द्रियाध्यायः २८.२-३५.१

171 हारीत २.२.५

172 हारीत २.२.७

173 हारीत २.२.८

174 हारीत २.२.९

175 हारीत २.२.१०-११

176 हारीत २.२.१२-१३

२१. कोऽपि सफलम् वृक्षम् पश्यति तदा धनसम्पत्तिश्च, पुष्पितं वृक्षं पश्यति चेत् सुखम् च, सम्पूर्णं वृक्षं पश्यति चेत् वाञ्छितम् फलं च भवेत्[177]।

काश्यपसंहितानुसारम् अदृष्टः, अश्रुतः अनुक्तः, कल्पितः, अभाषितः तथा कार्यमात्रः, जीर्णान्ते दृष्टः स्वप्नश्च फलवान् भवेत्[178]।

## २.२. नूतनयुगे स्वप्नविचारकाः

पौराणिकग्रीकरोमदेशेषु जनाः देवस्य वचनं स्वरोगनिवारणार्थम् अपिच स्वसमस्यानां कृते उत्तरमिति अपेक्ष्य स्वसप्ने वन्दनार्थं मन्दिरानि अगच्छन्। मध्ययुगे जनाः स्वप्नः पापेन सह सम्बन्धः अस्तीति अचिन्तयन्। ऊनविंशतिः शताब्दं यावत् स्वप्नविषये एवंविधविचारः आसीत्। ततः पश्चात् स्वप्नविषये वैज्ञानिकम् अवतरणमारब्धम्। अस्मिन् युगे स्वप्नविषये विचारं कृतविद्वद्सु मनोविश्लेषकः सिग्मन्ड्-फ्रोयिड् (Sigmund Freud), वैज्ञानिकः कार्ल्-गत्सव्-जून्ग् (Carl Gustav Jung), च पुरोगामिनौ स्तः[179]।

### २.२.१ सिग्मन्ड्-फ्रोयिड्

फ्रोयिड् (Freud) अनुसारं स्वप्नः मौलिकवशात् निद्रायाः रक्षकः इव आचरति। यदा वयं निद्रावतीर्णाः स्म तदा सर्वात् बहिर्लोकप्रोत्साहकात् (external stimuli) विनिर्मुक्ताः। रात्रौ निद्रावस्यां मनः स्वप्नोत्पादनेन निद्रावगतं बाहिरप्रोत्साखकेभ्यः (आलोक-कायिकवेग-शब्दोष्णशीतादित्भ्यः) तथा आभ्यन्तरिकप्रोत्साहकेभ्यः (internal stimuli) (भाव-भय-अतृप्ति-आशादिभ्यः) रक्षति। फ्रोयिड् इत्यस्य मुख्यावधारणा आभ्यन्तरिकप्रोत्साहकविषये अस्ति। सः कथयति यत् स्वप्नानां अधिकतरसम्बन्धः लैङ्गिक-क्रियाभिः मनोवेगैश्च सह अनुगतः अस्ति अपि च स्वप्नः तत्द्रष्टारः उपविज्ञानं व्याख्यातीति[180]। फ्रोयिड् अनुसारं स्वप्नस्य अङ्गद्वयमस्ति स्फुटावस्था (manifest) लीनविस्तीर्णावस्था (latent content) इति। फ्रोयिड् अनुसारं स्वप्नस्य तथ्यार्थः हि लीनविस्तीर्णावस्थायामस्ति। फ्रोयिड् उक्तवानस्ति यत् स्वप्नः हि अपूर्णानां गोपितानाम् उपवैज्ञानिक-आशानाम् अन्यप्रकारकं सफलीकरणम्[181]। "फ्रोयिड्" इत्यस्य स्वप्नविषयकमध्ययनं मूलतः मनोरोगीणामुपरि प्रारब्धम्। सः उक्तवान् स्वप्नः हि अविज्ञनस्य राजपथः इति ("The Royal Road to the Unconscious")।

### २.२.२ कार्ल्-गत्सव्-जून्ग्

---

177 हारीत २.२.१४-१६

178 काश्यप, इन्द्रियस्थानम्, ओषधभेषजेन्द्रियाध्यायः २५-२६.१

179 http://library.thinkquest.org/C005545/english/dream/freud.htm (accessed on 25.07.2012)

180 http://www.insomnium.co.uk/dream-theory/introduction-freud-theory-on-dreams/ (accessed on 25.07.2012)

181 http://en.wikipedia.org/wiki/The_Interpretation_of_Dreams (accessed on 25.07.2012)

"जून्ग्" इत्ययं वैज्ञानिकः मूलतः स्वप्नस्य अविज्ञानिकस्य (unconscious) सविज्ञानिकस्य (concious) च सम्बन्धः अदर्शयत्। तथा तस्य नवं योगदानं हि सामूहिक-अविज्ञानम् (collective unconscious) इति मतोद्दीपनम्।

जून्ग् अपि स्वप्नः प्रिय-अप्रियः (favourable and unfavourable) इति द्विप्रकारकं दर्शयति। जून्ग् इत्यस्य स्वप्नविषयकमवतरणम् आध्यात्मिकम् (spiritual) अस्ति यत्र फ्रोयिड् इत्यस्य लैङ्गिकम् (sexual) आसीत्। जून्ग् अनुसारं स्वप्नः हि अविज्ञानेन सह स्व सन्निवेदनं (communicating) परिज्ञानं (acquainting) च अस्ति। स्वप्नाः कस्यापि प्रबुद्धमनस्य तथ्याभिलाषाणां प्रच्छादनस्य उत्साहाः न सन्ति, अपितु जनस्य अविज्ञानस्य द्वाराः सन्ति। जून्ग् अनुसारं स्वप्नः जनस्य, अन्यैः सह तस्य सम्बद्धतायाः, यदा प्रबुद्धः आसीत् तस्मिन् काले संसिद्धीनां च अनावरणं करोति[182]। जून्ग् स्वप्नार्थविश्लेषणस्य कोऽपि सत्यमार्गः अस्तीति न स्वीकरोति। सः कथयति यत् स्वप्नस्यार्थविश्लेषणं तत्द्रष्ट्रा स्वतःनिर्णेतव्यं, तस्येच्छानुसारं भवितव्यमिति। अन्यस्य अर्थव्याखानात् स्वव्याखानं प्रशस्तम्[183]।

## उपसंहारः

आयुर्वेदे स्वप्नविषयकः पृथगंशः नास्ति। अपितु यत्र तत्र मिलितानि स्वप्नसम्बन्धकतत्त्वानि जनस्य स्वास्थ्य-अस्वास्थ्यसम्बन्धी सन्ति। आयुर्वेदानुसारम् आतुरपरीक्षायां एवं वैद्यकर्मनिश्चये च वैद्यस्य स्वप्नाः उपकारभूताः सन्ति। स्वप्नार्थविचारः फ्रोयिड् इत्यस्यैव मुख्यतः आतुरसम्बन्धी अस्ति। अपितु आयुर्वेदीयस्वप्नार्थविचारे विशेषः हि भविष्यमानात् स्वप्नफलात् विनिर्मोक्तुमपि दानहोमादिक्रियाणामुपदेशः। जून्ग् अपि आयुर्वेदवत् दिवास्वप्नः फलरहितः इति स्वीकरोति। फ्रोयिड् इत्यस्य एवं जून्ग् इत्यस्य च स्वप्नार्थविचारात् आयुर्वेदीयं दृष्टिकोणं विशिष्यते यत्र फ्रोयिड् अधिकशः स्वप्नः असफलीभूतानां लैङ्गिकावेगानां प्रतिरूपः इति च जून्ग् आध्यात्मिकतत्त्वमिति च दर्शयति अपितु आयुर्वेदः सम्मिश्रितं व्याख्यानं करोति तत्रापि अधिकाधिकतः रोग-आरोग्यसम्बन्धः स्वप्नः इति।

[182] http://www.dreamresearch.ca/pdf/jung.pdf (accessed on 25.07.2012)
[183] http://www.dreammoods.com/dreaminformation/dreamtheory/jung.htm (accessed on 25.07.2012)